## कृच्छ्रगहनयोः कषः । (२२/३०६२)

[1]कृच्छ्र गहन इत्येतयोरर्थयोः [2]कषेर्धातोः निष्ठायाम् इडागमो न भवति । कष्टोऽग्निः । कष्टं व्याकरणम् । [3]ततोऽपि कष्टतराणि सामानि । कृच्छ्रं दुःखम्, तत्कारणमप्यग्न्यादिकं कृच्छ्रम् इत्युच्यते । गहने – कष्टानि वनानि । कष्टाः पर्वताः । कृच्छ्रगहनयोः इति किम् ? कषितं सुवर्णम् ॥

## घुषिरविशब्दने । (२३/३०६३)

घुषेर्धातोरविशब्दने[4]ऽर्थे निष्ठायाम् इडागमो न भवति । घुष्टा रज्जुः । घुष्टौ पादौ । अविशब्दने इति किम् ? अवघुषितं वाक्यमाह । विशब्दनं प्रतिज्ञानम् । 'घुषिर[5]शब्दार्थे' (धा.पा. ६५३) इति भूवादिषु पठ्यते । 'घुषिर् विशब्दने' (धा.पा. १७२७) इति चुरादिषु । [6]तयोरिह सामान्येन ग्रहणम् । विशब्दनप्रतिषेधश्च ज्ञापकश्चुरादिणिज् विशब्दनार्थस्यानित्यः इति । तेनायमपि प्रयोगः उपपन्नो भवति, महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः । स्वाभिप्रायं शब्देनाविष्कृतवन्तः इत्यर्थः ॥

## अर्देः संनिविभ्यः । (२४/३०६४)

सम् नि वि इत्येतेभ्य उत्तरस्य अर्देः निष्ठायामिडागमो न भवति । समर्णः । न्यर्णः । व्यर्णः । अर्देः इति किम् ? समेधितः । संनिविभ्यः इति किम् ? अर्दितः ॥

## अभेश्चाविदूर्ये । (२५/३०६५)

अभिशब्दादुत्तरस्य अर्देः आविदूर्येऽर्थे निष्ठायामिडागमो न भवति । [7]अभ्यर्णा सेना[8] । अभ्यर्णा शरत् । आविदूर्ये इति किम् ? अभ्यर्दितो वृषलः । शीतेन पीडितः इत्यर्थः । विदूरम् विप्रकृष्टम्, ततोऽन्यदविदूरम्, तस्य भावः आविदूर्यम् । एतस्मादेव निपातनात् 'न नञ्पूर्वात् तत्पुरुषात्' (५.१.१२१/१७८३) इत्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति ॥

## णेरध्ययने वृत्तम् । (२६/३०६६)

ण्यन्तस्य वृत्तेर्निष्ठाया[9]मध्ययनार्थे वृत्तमिति इडभावः णिलुक् च निपात्यते । वृत्तो गुणो देवदत्तेन । वृत्तं पारायणं [10]देवदत्तेन । अध्ययने इति किम् ? [11]वर्तितमन्यत्र । वृतिरयमकर्मकः, स ण्यर्थे वर्तमानः सकर्मको भवति । तेन निर्वृत्तम् इति हि प्रकृतेरेव कर्मणि क्तप्रत्ययो [12]दृश्यते । [13]तद्वदिहापि ण्यर्थवृत्तेरेव च वृतेः वृत्तो गुणो देवदत्तेन इति [14]भविष्यति इति निपातनमनर्थकम् ? तत् क्रियते [15]यदापि णिचैव ण्यर्थोऽभिधीयते तदा वर्तितम् इत्यध्ययने मा भूत् इति केचित् । [16]अपरे तु वर्तितो गुणो देवदत्तेन इत्यपि इच्छन्ति ॥

---

1. कर्षान्तिधातोः इत्यधिकम् क. 2. कर्षतेः ब. 3. ततोऽपि नास्ति क. 4. अर्थे नास्ति क. 5. विशब्दने क. 6. द्वयोरिह क.ब.ई, सोऽपि इह गृह्यते इ. 7. अभ्यर्णे शेते ब. 8. समीपस्था इत्यर्थः इत्यधिकम् ह. 9. अध्ययनेऽर्थे ड. 10. देवदत्तेन नास्ति क. 11. वर्तितव्यम् क. 12. गृह्यते क. 13. तदिहापि क. 14. यस्य विभाषा इति प्रतिषेधो भवति क. 15. यदा णिच्चेरर्थे क. 16. वाक्यमिदं नास्ति क.